ઓં સત્ગુરુભ્યો નમઃ

## રાહુ સ્તોત્ર મહામન્ત્રં

-----------------------------------

અસ્ય શ્રી રાહુસ્તોત્ર મહામન્ત્રસ્ય
વામ દેવ ઋષિઃ અનુષ્ટુપ્ છન્દઃ રાહુર્દેવતા
રાહુપ્રસાદ સિદ્ધ્યર્ત્થે જપે વિનિયોગઃ

### કશ્યપ ઉવાચઃ-

શ્રુણ્વન્તુ મુનયઃ સર્વ્વે
રાહુપ્રીતિકરં શુભં
સર્વ્વરોગ પ્રશમનં
વિષભીતિહરં પરં (1)

સર્વસમ્પદ્કરં ચૈવ
ગુહ્યમેતદનુત્તમં
આદરેણ પ્રવક્ષ્યામિ
શ્રૂયતાં અવધાનતઃ (2)

રાહુઃ સૂર્યરિપુશ્ચૈવ
વિષજ્વાલી ભયાનકઃ
સુધાંશુવૈરિઃ શ્યામાત્મા
વિષ્ણુચક્રાહિતો બલી (3)

ભુજકેશસ્તીક્ષ્ણ દંષ્ટ્રઃ
ક્રૂરકર્મ્મા ગ્રહાધિપઃ
દ્વાદશૈતાનિ નામાનિ
નિત્યં યો નિયતઃ પઠેત્ (4)

જપ્ત્વા તુ પ્રતિમાં રમ્યાં
સીસજાં માષ સંસ્તિતાં
નીલૈર્ ગન્ધાક્ષતૈ પુષ્પૈર્
ભક્ત્યા સંપૂજ્ય યત્નતઃ (5)

વિધિના વહ્નિમાદાચા
દૂર્વાન્નાજ્યાહુતીઃ ક્રમાત્
તન્મન્ત્રેણૈવ જૂહુચાત્
યાવતષ્ટોત્તરં શતં (6)

હુત્વૈવં ભક્તિમાન્ રાહું
પ્રાર્ત્થયેત્ ગ્રહનાયકં
સર્વ્વાપત્ વિનિવૃત્યર્ત્થં
પ્રાઞ્જલિ પ્રણતો નરઃ (7)

રાહો કરાળવદન
રવિ ચન્દ્ર ભયંકર
તમોરૂપનમસ્તુભ્યં
પ્રસાદં કુરુ સર્વ્વદા (8)

સિંહિકા સુત સૂર્યારે
સિદ્ધ ગન્ધર્વ્વ પૂજિત
સિંહવાહન નમસ્તુભ્યં
સર્વ્વાન્ રોગાન્ નિવારય (9)

કૃપાણ પાલકાહસ્ત
ત્રિશૂલિન્ વરદાયક
કરાળાતિ કરાળાસ્ય
ગદાન્ મે નાશયાખિલાન્ (10)

સ્વર્ભાનો સર્પ્પવદન
સુધાકર વિમર્દ્દન
સુરાસુરવરસ્તુત્ય

સર્વ્વદાત્વં પ્રસીદ મે (11)

ઈતિ સંપ્રાર્િત્થતો રાહુઃ
દુષ્ટસ્તાનગતોપિ વા
સુપ્રીતો જાયતે તસ્ય
સર્વ્વાન્ રોગાન્ વિનાશયેત્ (12)

વિષાન્ત જાયતે ભીતિઃ
મહારોગસ્ય કા કથા
સર્વ્વાન્ કામાનવાપ્નોતિ
નષ્ટં રાજ્યં અવાપ્નુયાત્ (13)

એવં પઠેદનુદિનં સ્તવરાજમેદં
મર્ત્યઃ પ્રસન્નહૃદયો વિજિતેન્દ્રિયો યઃ
આરોગ્યમાયુરતુલં લભતે સુપુત્રાન્
સર્વ્વે ગ્રહાવિષાસ્સ્યુરતિપ્રસન્નાઃ (14)

**શ્રી રાહુસ્તોત્રં સમ્પૂર્ણં**